1924.

THE

AMBÂ SANSKRIT SERIES;

A.

RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 322.

याज्ञवल्क्यस्मृतिः ।

मिश्रकृत 'वीरमित्रोदय' टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा' टीकया च सहिता ।
साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
ज्योतिष्याचार्य-होशिङ्ग जगन्नाथशास्त्रिणा च
संशोधिता ।

YĀJÑAVALKYA SMRTI

with the Commentary of Mitra Mis'ra's
Mitrodaya and Vijnānes'vara's Mitāksarā.


EDITED BY

Nārāyaṇa S'āstrī khiste Sāhityāchārya Assistant Librarian
Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya Sādholāl Scholar
Sarasvatibhavana Benares.

FASCICULUS I-V.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1924.


केन्द्रीय
वनस्थ
श्रेणी संख्या 891.
पुस्तक संख्या M5
अवाप्ति क्रमांक 2

॥ श्रीः ॥

॥ याज्ञवल्क्यस्मृतिः ।

श्रीमन्मित्रमिश्रकृत वीरमित्रोदयाख्यव्याख्यया श्रीमद्विज्ञानेश्वरकृतया मिताक्षराख्यव्याख्यया च संवलिता ।

(वी०मि०) निःस्वाम्यं स्वस्य शंसन्निव विदधदिव द्वैतवार्तामिहार्ता-
मद्वन्द्वं शीलयिष्यन्निव च निजपदं शीलिताऽद्वन्द्वभावः ॥
अव्यात्त्वां शुद्धसत्त्वाङ्कुर इव विशदो विश्वभृत्क्रोडभर्तु-
र्दंष्ट्रेवोच्चैरनाशी हरमुकुटशशीवैकदन्तस्य दन्तः ॥ १ ॥
अस्ति क्षोणीप्रशस्तिस्तनुरिव गिरिशस्योंडछी(१)पूरपूर्वा
दुर्वाराभात्तदुर्गातनुरतनुरिपुर्बिभ्रती भूरिभूतिम् ॥
नीराजद्राजलक्ष्मीः सगुणमपि रुचा निर्धुनाना पिनाकं
दृप्यन्नागाजिनश्रीः सुवृपमधिगता नागरावद्धशोभा ॥ २ ॥
अरिकुलकरिकुम्भकूटपाटी शिखरितटीमिव यां प्रभापटीयान् ॥
अधिवसति महीन्दुवीरसिंहो मधुकरसाहिमहीशसिन्धुजन्मा ॥ ३ ॥
श्रेयःसम्भृतवीरसिंहनृपतेराप प्रतापोदया-
द्दावोद्दामहुताशनाहितचमूरार्द्रेन्धनस्य श्रियम् ॥
या(२) चाऽन्तः स्फुटति ध्वनिं प्रकटयत्यप्यश्रुधारारसा—
विर्भावं तनुते तनोति कुयशोधूमैर्जगच्छ्यामलम् ॥ ४ ॥
गाम्भीर्यं वहु वीरसिंहनृपतेरम्भोधिरन्तः स्मरन्
दुर्वारौर्वशिखिच्छलेन निविडप्रौढोपतापं दधौ ॥
स्मारंस्मारमुदारसारनधिकोद्भेच्चमत्कारतो
जातो ऽचेतन एव जातजडिमा श्यामाकृतिः क्ष्माधरः ॥ ५ ॥
वाल्याऽवाल्यान्तरालस्थगितमिव मनः कामकौमारकेली-
मस्वीकुर्वन् किशोरीचरण इव रिपुश्चञ्चलीभूय भूयः ॥

---

(१) छा-इति खपुस्तके पाठः । (२) येनाऽन्तः इति खपुस्तके पाठः ।

क्रीडान्तावस्थकान्ताजन इव विगलत्कुन्तलो व्यस्तवासा
यस्य त्रासाज्जरत्याः स्तन इव निपतन्नुन्नतिं नैव लेभे ॥ ६ ॥
भगोलाद् भूगोलाद्बहिरभिययासन्ति भवितुं
पठानाः पाठीना इव जलविलीनां धियमधुः ॥
मघो मोघारम्भोऽपसरति बुंदेलाकुलपतौ
रणार्थं दुर्वारे रणति रणसारे रणभुवि ॥ ७ ॥
विभ्राणो बुधमित्रतां कविगुरू राजा धरानन्दनः
शोभाभिर्विलसत्तमो दिवि लसत्केतुश्च भास्वत्सुतः ॥
इत्थं जन्यजनुर्नवग्रहतनुः किन्त्वस्ति तुङ्गः सदा
सोद्रेकः किल वीरसिंहधरणीधौरेयचूडामणिः ॥ ८ ॥
शुभ्राभाविभवार्थमात्तवृषभो भोगीन्द्रभागीरथी-
भास्वद्भूतिभनाथभूषितवपुः कैलासवासी भवन् ॥
वीरश्रीयुतवीरसिंहनृपतेः सम्भाव्य शम्भुर्यशः
शान्त्यै साम्यविधेर्बभार गरलं कण्ठे किमुत्कण्ठितः ? ॥ ९ ॥
हेमोर्वीधरकर्णिकापरमहाशैलौघसंवर्तिका
व्यालेन्द्रैकमृणालिका गजघटाव्यालीनभृङ्गालिका ॥
सप्ताम्भोधिमधूलिकाविमलिका क्षोणीयशोमालिका
सम्पर्के ऽप्रतिमल्लवीरनृपतेः शुभ्रारविन्दायते ॥ १० ॥
व्रीडाभिर्जडिमोदयादुपलनां चिन्तामणिः पाशवं
कामं कामगवी च कल्पविटपी स्वर्गाटवीं गाहते ॥
आकर्ण्यार्जितवीरसिंहनृपतेर्दानोर्जिहानं यशः
सान्तर्द्धानतया ऽद्य निर्दयमधो नेतारमस्तौद्बलिः ॥ ११ ॥
वसु वर्षति वीरसिंहदेवे जलदः केवलमम्बु यद्विजेषु ॥
इयतैष यशोवदातविश्वो मलिनः सोऽजनि लज्जया तयैव ॥१२॥
दूराद् दुश्च्यवनो दिवस्पतिरभूद्दिक्कोणभाक् पावकः
कीनाशः स्वयमेव दण्डमितवान् रक्षोपि रक्षोक्तिभाक् ॥
पाशं च स्वयमाददे पतिरपां वातो गतो ऽदृश्यतां
प्रस्थाने धनदोऽस्य गुह्यकपदं दुर्गाप्तिमुग्रो ऽचरत् ॥ १३ ॥
आरोहो गीर्लतायाः सदुपकृतिपदं धर्मभूमीरुहाणा-
मुद्यानं शुद्धकीर्तेरुपचयभवनं श्रीमृगीवागुरैव ॥
आकारो विप्रताया निधिरपि महसः सर्वविद्याऽनवद्यो

यद्वारि द्योतते श्रीद्युमणिरिव तमो मूर्च्छयन्मित्रमिश्रः ॥ १४ ॥
क्ष्माचक्रं चारु चक्रे समुचितनयतो रक्षितं भूमिदेवान्
देवांश्च प्राप्तसेवान् विमलमपि यशो वीरसिंहो नरेन्द्रः ॥
चित्तं मत्त्वाऽप्यसारं वितरदविरतं याज्ञवल्क्योक्तिमुक्ता-
हारं स्मृत्यर्थसारं रचयितुमथ स प्रादिशन्मित्रमिश्रम् ॥१५॥
उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानन्दधीमान्
श्रीभाजो मित्रमिश्राञ्जगदुपकृतये विभ्रदादेशदीपम् ॥
ज्ञानानां दैन्यदोषापहमकलिभयं याज्ञवल्क्योक्तिकोशाद्
दृष्ट्वा स्मृत्यर्थसारं समचिनुत यशो धर्मलक्ष्मीविहारम् ॥ १६ ॥

इह हि भगवता महर्षिणा याज्ञवल्क्येन लोकहिताय प्रणीतं धर्मशास्त्रं तच्छिष्यप्रवरो मानवं भृगुरिव प्रश्नोत्तरप्रबन्धेन संक्षिप्य वक्तुं प्रस्तौति—

योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ॥
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥ १ ॥

इत्येवं सम्प्रदायविदो ऽवतारयन्ति । परे पुनर्योगीश्वरमित्याद्यपि याज्ञवल्क्यप्रणीतमेव । 'कर्माण्यपि जैमिनिः फलार्थत्वात्' इति [जै० सू० ३ । १ । ४ ।] 'तदुपर्यपि बादरायणः सम्भवात्' [ब्र०सू० १ । ३ । २६] इत्यादावाचार्याणामित्थमेव स्वग्रन्थे स्वनामकीर्तनस्य दर्शनात् । योगीश्वरमित्यादि स्वोत्कर्षकीर्तनं तु शिष्याणां श्रद्धादार्ढ्याय न त्वभिमानविशेषविजृम्भितमिति वर्णयन्ति ।

इदं च शास्त्रमध्यायत्रयात्मकम् । तत्र प्रथमेऽध्याये-(१) उपोद्घातप्रकरणम् [श्लो० १-९] (२) ब्रह्मचारिप्रकरणम् [श्लो० १०-५०] (३) विवाहप्रकरणम् [श्लो० ५१-८९] (४) जातिवर्णविवेकप्रकरणम् [श्लो० ९०-९६] (५) गृहस्थप्रकरणम् [श्लो० ९७-१२८] (६) स्नातकप्रकरणम् [श्लो० १२९-१६६] (७) भक्ष्याऽभक्ष्यप्रकरणम् [श्लो० १६७-१८१] (८) द्रव्यशुद्धिप्रकरणम् [श्लो० १८२—१९७] (९) दानप्रकरणम् [श्लो० १९८-२१६] (१०) श्राद्धप्रकरणम् [श्लो० २१७-२७०] (११) शान्तिप्रकरणम् [श्लो० २७१-३०८] (१२) राजधर्मप्रकरणम् [श्लो० ३०९-३६८] एवं द्वादश

प्रकरणानि । द्वितीयतृतीयाध्याययोस्तु प्रकरणानि तत्र तत्राऽभिधास्यन्ते । तदेतद्यथामति प्राचीननिबन्धानुपजीव्य व्याख्यायते ।

योगीश्वरामित्यादि । योगो वृत्तिनिरोधः तद्वतामीश्वरं श्रेष्ठम् । एतेन सार्वज्ञ्यं सूचितम् । यद्वा, प्रशंसायामिनिः । प्रशस्तयोगवन्तमीश्वरमणिमादिविभूतियुक्तञ्च ॥ अणिमादिकमभिधाय 'ऐश्वर्यं कारणैरेभिर्योगिनः प्रोक्तमष्टधा' इति मार्कण्डेयपुराणात् । अत्र योगीश्वरपदप्रयोगान्मङ्गलमपि निबद्धं वेदितव्यम् । याज्ञवल्क्यमिति=नामाऽनुकीर्तनम् । सम्पूज्य=कायवाङ्मनोभिः सम्यक् समाराध्य । मुनयः=सोमश्रवःप्रमुखाः । अब्रुवन् । किम् ? वर्णेत्यादि । वर्णाः=ब्राह्मणादयः । आश्रमाः=ब्रह्मचर्यादयः 'ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्री द्विजात्यग्रजन्मभृद्देववाडवाः' इत्यनुशासनात् । इतरे=सङ्कीर्णाः । 'द्वन्द्वे च' इति सर्वनामसंज्ञानिषेधादितराणामिति रूपम् । वर्णादीनां पुंस्त्वं चाऽत्र न विवक्षितं बीजाऽभावात् स्त्रीणामपि सङ्ग्रहः, सामान्यपरत्वान्नपुंस(१)कतेतरशब्देन तासामप्युक्तिरित्यप्याहुः । तेषां धर्मान्=स्मार्तान् अस्मत्सन्देहास्पदत्वोचितान् । अशेषतः=कात्स्न्र्येन । नः=अस्मान् । ब्रूहि ।

इत्थं व्याख्याने च केषाञ्चिद्धर्माणामग्रेऽनभिधानेऽपि न न्यूनतेत्यवधेयम् । न च दण्डनीतिदारोपगमादीनां लौकिकत्वेन धर्मभिन्नानामप्यभिधानादाधिक्यमाशङ्कनीयम्, तेषामपि नियमाविषयतया धर्मत्वाद्विध्यादिविषयतयेव यागादीनां स्वरूपतस्तेषामलौकिकत्वात् । विध्युपलन्दानेन तु तेषामलौकिकत्वं दण्डनीत्यादीनां च नियमोपसन्दानेनेति न काश्चिद्विशेषः । इदमेव चाऽभिसन्धाय भगवान् जैमिनिर्धर्मलक्षणं विवक्षन्नसूत्रयत् "चोदनालक्षणोऽर्थो धर्मः"[जै०सू० १।१।२।] इति । एतत्सूत्रव्याख्यानं च प्रकृतोपयोग्यपि विस्तरभयान्नेह् ततमन्यत्र द्रष्टव्यम् । धर्मानित्याद्यर्थवद्वचनेन चतुर्वर्गस्य ग्रहणमिति स्मृतयः । अतो धर्मोऽभिधेयः कण्ठत एव दर्शितः । स च षड्विधः–वर्णधर्म, आश्रमधर्मो, वर्णाश्रमधर्मो,गुणधर्मो,निमित्तधर्मः, साधारणधर्मश्च । तत्राऽऽद्यो मद्यपानवर्जनादिः, द्वितीयो भैक्ष्यचर्यादिः,तृतीयः पालाशदण्डधारणादिः, चतुर्थः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः, पञ्चमः प्रायश्चित्तम्, षष्ठः=अहिंसादिः । द्विविधश्च प्रवृत्तनि-

(१) सकलिङ्गेनेतरशब्देन इति ख्पुस्तके पाठः ।

वृत्तभेदात् । तथा च मनुः—

प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम् ।
इह चाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ।

त्रिविधश्च नित्यनैमित्तिककाम्यभेदादिति विवेक्तव्यम् । प्रयोजनं तु स्वर्गाद्यलौकिकश्रेयःसाधनवाचिना धर्मपदेनैव सूचितम् । धर्मज्ञानादिप्रणाडिकयैतच्छास्त्रस्य धर्मप्रयोजकतायाः कटाक्षितत्वादिति ॥ १ ॥

(मिता०) धर्माधर्मौ (१)तद्विपाकास्त्रयोऽपि
(२)क्लेशाः पञ्च प्राणिनामायतन्ते ॥
यस्मिन्नेतैर्नो परामृष्ट ईशो
यस्तं वन्दे विष्णुमाकारवाच्यम् ॥ १ ॥
याज्ञवल्क्यमुनिभाषितं मुहु-
र्विश्वरूपविकटोक्तिविस्तृतम् ॥
धर्मशास्त्रमृजुमिर्मिताक्षरै-
र्बालबोधविधये विविच्यते ॥ २ ॥

याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यमुनिप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास । यथा (३)मनुप्रणीतं भृगुः । तस्य चायमाद्यः श्लोकः—

योगीश्वरमिति । योगिनां सनकादीनामीश्वरः (४)श्रेष्ठस्तं याज्ञवल्क्यं सम्पूज्य मनोवाक्कायकर्मभिः पूजयित्वा मुनयः(५)सोमश्रवःप्रभृतयः श्रवणधारणयोग्या अब्रुवन् उक्तवन्तः धर्मान्नोऽस्मभ्यं (६)ब्रूहीति । कथम् ?

---

(१) जात्यायुर्भोगा विपाकाः ।

(२) अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः ॥ (पात० सू० २ । ३ ।) तत्राऽविद्या नाम अनित्ये, अशुचौ, दुःखे, अनात्मनि च नित्यशुचिसुखात्मना प्रत्ययः । वस्तुतोऽत्यन्तविभक्तयोरपि दृक्शक्तिदर्शनशक्त्यात्मनोः पुरुषबुद्ध्योरनाद्यविद्यामाहिम्ना बुद्ध्येकात्मतावभासः पुरुषस्याऽस्मिता ।

अनुभूतसुखस्य तत्र तत्साधने वा लोभो रागः ।
अनुभूतदुःखस्य तत्र तत्साधनेवा परिजिहीर्षा द्वेषः ॥

पामरस्येव श्रुतानुमितविवेकिनोऽपि विदुषो यो नैसर्गिको रूढो मरणादेस्त्रासः सोऽभिनिवेशः ।

(३) मनुनेक्तं ख० (४) प्रभुस्तं ख० (५) सोमश्रवादयः क० (६) ब्रूहि कथयेति क०

अशेषतः कात्स्न्र्येन केषाम् वर्णाश्रमेतराणाम् वर्णा ब्राह्मणादयः, आश्रमा ब्रह्मचारिप्रभृतयः, इतरे ऽनुलोमप्रतिलोमजाता मूर्धावसिक्तादयः। इतरशब्दस्य 'द्वन्द्वे च' इति सर्वनामसंज्ञाप्रतिषेधः। अत्र च धर्मशब्दः (१)षड्विधस्मार्तधर्मविषयः । तद्यथा-वर्णधर्म, आश्रमधर्मौ, वर्णाश्रमधर्मौ, गुणधर्मो, निमित्तधर्मः, साधारणधर्मश्चेति । तत्र वर्णधर्मो 'ब्राह्मणो नित्यं मद्यं वर्जयेत्'इ २)त्यादिः। आश्रमधर्मोऽग्नीन्धनभैक्ष्यचर्यादिः। वर्णाश्रमधर्मः 'पालाशो दण्डो ब्राह्मणस्य'इत्येवमादिः । गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः । निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम् । साधारणधर्मोऽहिंसादिः । 'न हिंस्यात्स(३)र्वाभूतानि'इत्याचण्डालं साधारणो धर्मः । 'शौचाचा(४)रांश्च शिक्षयेत्'इत्याचार्यकरणविधिप्रयुक्तत्वाद्धर्मशास्त्राध्ययनस्य प्रयोजनादिकथनं नातीवोपयुज्यते । तत्र चायं क्रमः । प्रागुपनयनात्कामचारकामवादकामभक्षाः । ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्राध्ययनं, ततो धर्मशास्त्रविहितयमनियमोपेतस्य वेदाध्ययनं, ततस्तदर्थजिज्ञासा, ततस्तदर्थानुष्ठानमिति । तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यन्ते तथापि धर्मस्य प्राधान्याद्धर्मग्रहणम् । प्राधान्यं च धर्ममूलत्वादितरेषाम् । न च वक्तव्यं धर्ममूलोऽर्थो ऽर्थमूलो धर्म इत्यविशेष इति । यतोऽर्थमन्तरेणापि(५)जपतपस्तीर्थयात्रादिना धर्मनिष्पत्ति, रर्थलेशोऽपि न धर्ममन्तरेणेति । एवं काममोक्षावपीति ॥१॥

मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन् ॥
यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत ॥ २ ॥

(वी० मि०) मिथिला विदेहनगरी तस्यां स्थितः । एतेन देशप्रकर्षनिबन्धनोऽध्यापनोपयोग्युत्कर्षः सूचितः । स तथा पृष्टः योगीन्द्रः= योगिनां परमेश्वरोऽपि । क्षणं=कञ्चित्कालमभिव्याप्य । ध्यात्वा प्रकृत-

---

(१) स्मार्तकविषयः० (२) वर्जयेदिति क.
(३) अयमेव पाठो युक्तः । सर्वभूतानि इति ख. पाठः.
(४) श्रुत्युक्तशौचाचारान ख. (५) जपतीर्थयात्रा क० ख०

वचनौपयिकमर्थजातं कश्चित्स्वरसतः, कश्चिच्च मनःप्रणिधानेन चिन्तयित्वा। 'क्षणमात्रमृषिस्तस्थौ सुप्तमीनो यथा ह्रदः। सोऽपश्यत्प्रणिधानेन' [रघु०१।७३,७४] इत्यादौ योगिनामपि सूक्ष्मेक्षणाय प्रणिधानप्रतिपादनात्। अब्रवीत्—यस्मिन्देश इत्यादि। मुनीन्=मननशीलान् तर्कोपजीविन इति यावत्। प्राचीनाचार्यशैलीमनुसरता महर्षियाज्ञवल्क्येनाऽत्राऽनुक्तैरपि स्मृत्यन्तरोक्तैः कैश्चिद्धर्मैरेतच्छास्त्रोपबृंहणे शिष्याणां सामर्थ्यसूचनादनुक्त(१)निबन्धनान्यूनता परिहृतेत्यवधेयम्। धर्मान्=बुभुत्सितान्। निबोधत=निसृष्टबोधविषयीकुरुत। बोधस्य यथात्वं देशकालहेतुस्वरूपलक्षणप्रमाणफलादितत्तद्धर्मसम्बन्धिक्रोडीकरणेनेति प्रथमतः प्राधान्याद्देशेन धर्मान् विशिनष्टि। यस्मिन्=क्वचिदपि देशे=भूभागे 'भारतवर्षरूपे; तदुपक्रम्य 'कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्' इति विष्णुपुराणात्। मृगः कृष्णः=इण इत्यर्थः। चरति=स्वभावत इति शेषः। 'कृष्णसारस्तु चरति मृगो यत्र स्वभावतः' इति मनुवचनात्। तस्मिन् अनुष्ठेयान्। अत्र यस्मिन्नित्यादिसिद्धवल्लिखनाद्ब्रह्मावर्तादेः पुण्यत्वाभिधानमन्यत्र प्रशंसार्थम्।

आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात्।
तयोरेवाऽन्तरं गिर्योरार्यावर्तं प्रचक्षते॥

इति मनुना कृष्णसाररहितस्याऽपि देशस्याऽऽर्यावर्तत्वकथनेन धर्मत्वप्रतिपादनं तु असम्पूर्णधर्माभिप्रायेण; विशिष्टदेशे धर्माणामेव विशेषणाद्धर्मोत्पत्तावार्यावर्तादिविशेषो नाऽपेक्षितः, किन्तु भारतवर्षमात्रमिति मन्तव्यम्॥ २॥

(मिता०) एवं पृष्टः किमुवाचेत्याह—

मिथिलास्थ इति। मिथिला नाम नगरी तत्रावस्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा कञ्चित्कालं मनः समाधाय एते श्रवणाधिकारिणो विनयेन पृच्छन्तीति युक्तमेतेभ्यो वक्तुमित्युक्तवान्मुनीन्। किम्। यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति। कृष्णसारो मृगो यस्मिन्देशे स्वच्छन्दं विहरति तस्मिन्देशे वक्ष्यमाणलक्षणा धर्मा अनुष्ठेया नान्यत्रेत्यभिप्रायः॥ २॥

---

(१) दनुक्तानिबन्धनान्यूनता—इति खपुस्तके पाठः।

(वी० मि०) अथ धर्मस्य प्रयोजनहेतून् प्राधान्यगुणत्वाभ्यामापातः संमुग्धानेव प्रमितिप्रयोजकांश्च प्रदर्शयन् प्रकृतशास्त्रस्य पूर्वकटाक्षितधर्मप्रयोजकताप्रकटनेन प्राक् सूचितं प्रयोजनसम्बन्धं स्फुटयति—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ ३ ॥

पुराणानि—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥
इति लक्षितानि ।
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथाऽन्यत्नारदीयं च मार्कण्डेयञ्च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशं चैव स्कान्दं चाऽत्र त्रयोदशम् ।
चतुर्दशं वामनकं कौर्मं पञ्चदशं स्मृतम् ॥
मात्स्यञ्च गारुडं चैव ब्रह्माण्डञ्च ततः परम् ।
इति विष्णुपुराणे दर्शितानि ।

कौर्मे तु (१)विष्णुपुराणमनन्तर्भाव्य वायुपुराणमुपादायाऽष्टदशत्वमुक्तं तदनयोर्विकल्प एव । भागवतं प्रसिद्धमेव ।

अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनैव यदीच्छसि भवक्षयम् ॥ इति वचनात् ।
यत्रोपक्रम्य गायत्रीमुच्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥

इति लक्षणस्य तत्रैव सम्भवाच्च । प्रसिद्धे गायत्र्योपक्रमस्य व्याख्यातृभिर्दर्शितत्वात्पुराणान्तरे तल्लेशस्याऽप्यभावादिति निपुणमालोचनीयम् ।

अत्र पुराणशब्देनोपपुराणादीन्यप्युपलक्ष्यन्ते । तत्र कूर्मपुराणम्—

---

(१) विष्णुपुराणमुपादायेति खपुस्तके पाठः ।

अन्यान्यपि पुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥
तृतीयं पाद्ममुद्दिष्टं कुमारेण सुभाषितम् ।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दिप्रवर्तितम् ॥
दुर्वाससोक्तमाश्चर्यं(१) नारदोक्तमतः परम् ।
कापिलं वामनं चैव तथैवोशनसोदितम् ॥
ब्रह्माण्डसंज्ञकं चैव कालिकासंज्ञमेव च ।
माहेश्वरं तथा साम्बं सौरधर्मानुसंश्रयम् ॥
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ।
इदञ्च पञ्चदशमं पुराणं कौर्ममुच्यते ॥
पद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनम् ।
तदष्टादशसाहस्रं नारसिंहमिहोच्यते ॥
नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते ।
नन्दापुराणं तल्लोके नन्दाख्यमिति कीर्त्यते ॥
यत्तु साम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ।
तत्प्रोच्यते पुनर्लोके साम्बमेव मुनिव्रताः ॥
एवमादित्यसंज्ञा च तत्रैव परिगण्यते ।
अष्टादशभ्यस्तु पृथक् पुराणं यत्तु दृश्यते ॥
विजानध्वं मुनिश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ।

विनिर्गतमुद्धृतम्। प्रमाणकरणे भविष्यत्पुराणम्—

अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णञ्च पञ्चमं वेदं(?) यन्महाभारतं स्मृतम् ।
सौराश्च धर्मा राजेन्द्र ! मानवोक्ता महीतले ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ।

न्यायः='प्रमाणप्रमेय'इत्यादि'हेत्वाभासाश्च यथोक्ताः'इत्यन्तं पञ्चाध्यायीशास्त्रमक्षपादप्रणीतम् । न्यायपदेन च साक्षाच्छ्रुतिविचारोदासीनानि वैशेषिकसाङ्ख्यपातञ्जलान्यपि गृह्यन्ते । मीमांसा=श्रुत्यादिविचारः कर्मविषयकः 'अथातो धर्मजिज्ञासा'[जै०सू०१।१।१] इत्या-

(१) दुर्वाससोक्तमाचर्यं-इति ख० पुस्तके ।

दिद्वादशाऽध्यायीरूपो जैमिनिप्रणीतः, ब्रह्मविषयकश्च 'अथाऽतो ब्रह्मजिज्ञासा'[ब्र० सू० १।१।१]इत्यादिचतुरध्यायीरूपो व्यासप्रणीत इति द्विविधः। धर्मशास्त्राणि=स्मृतयो मन्वादिप्रणीता धर्मसंहिताः।

दृष्टार्था तु स्मृतिः काचिददृष्टार्था तथा परा।
दृष्टाऽदृष्टार्थरूपाऽन्या न्यायमूला तथा परा॥
अर्थवादस्मृतिस्त्वन्या शिष्टैर्दृष्टा तु पञ्चमी।

इति भविष्यत्पुराणे विभक्ताः। गृह्याणि स्मृतिरूपाण्येव। स्मृतिपदेन पञ्चरात्राण्यपि गृह्यन्ते,तेषामपि मन्वादिस्मृतिवदेव प्रामाण्यात्।

अलाभे वेदमन्त्राणां पञ्चरात्रोदिते नये।
आचारेण प्रपद्यन्ते मामायास्यन्ति मानवाः॥

इति वाराहे श्रीभगवद्वाक्यात्।

अभावे वेदमन्त्राणां पञ्चरात्रोदिते विधिः।

इति तत्रैव वचनान्तरात्।

पञ्चरात्रविधानेन सम्पूज्य मधुसूदनम्।

इति ब्रह्मपुराणात्। महाभारते पञ्चरात्राणां प्रशंसितत्वाच्च।

एवञ्च वेदान्ते भट्ट(१)वाक्ये च पञ्चरात्राप्रामाण्याऽभिधानं वेदविरुद्धपञ्चरात्रविषयमिति मन्तव्यम्। तथा हि-स्मृतिपादे 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' [जै० सू० १।३।३] इति सूत्रे प्रत्यक्षश्रुतिविरुद्धस्मृतिप्रामाण्यमनपेक्ष्यमिति व्यवस्थाप्यते।'हेतुदर्शनाच्च' [जै० सू० १।३।४] इति सूत्रेऽपि भट्टपादाः—(२)'यान्येतानि त्रयीविद्भिर्न परिगृहीतानि किञ्चित्तान्मिश्र(३)धर्म(४)कञ्चुकच्छायापतितानि लोकोपसङ्ग्रहलाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीतासम्बद्धदृष्टशोभादिप्रत्यक्षानुमानोपमानार्थापत्तिप्रायशास्त्रमूलोपनिबद्धानि सांख्ययोगपाञ्चरात्र(५)पाशुपतशाक्यनिर्ग्रन्थपरिगृहीत(६)ध-

---

(१) भट्टवार्तिके— इति ख० पुस्तके।
(२) अयं पाठः 'वनारस संस्कृत सीरीज्' मुद्रितपुस्तकस्थः पृ० ११४—११५।
(३) तुल्याश्रय-इति क. ख. पुस्तकयोः पाठः।
(४)धर्म— इति ख० पुस्तके नाऽस्ति।
(५) 'पाञ्चरात्र' इत्यस्य स्थाने 'मन्त्र'-इति क. ख. पुस्तकयोः पाठः।
(६) धर्मा-इति क. ख. पुस्तकयोर्नास्ति.।

र्माऽधर्मनिबन्धनानि विषचिकित्सावशीकरणोच्चाटनोन्मादनादि(१)स-
मर्थकतिपयमन्त्रौषधिकादाचित्कसिद्धि(२) बलेनाऽहिंसासत्यवचन-
(३)दमदानदयाश्रुतिस्मृति(४)संवादिस्तोकार्थगन्धवासितजीविका-
प्रायार्थान्तरोपदेशीनि, यानि च बाह्यतराणि (५) म्लेच्छाचारमिश्र-
कभोजनाचरणनिबन्धनानि, तेषामेवैतच्छ्रुतिविरोधहेतुदर्शनाभ्याम-
नपेक्षणीयत्वं(६) प्रतिपाद्यते'इति प्राहुः । अत एव रत्नमालायां भोजराजेन
'प्रोक्तानी'त्यादिभगवद्वचनमु(७)दाहृत्य कूर्मपुराणवचनं प्रत्युदाहृतम् ।

अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनानि तु ।
वामं पाशुपतं सोमं लक्षणं(?) चैव रौ(८)द्रवम् ॥
असत्यमेतत्कथितं वेदबाह्यं तथैव तत् ।

तथा—

वामपाशुपताचारास्तथा वै पाञ्चरात्रिकाः ।
भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा ॥

पाञ्चरात्रिका वेदविरुद्धपञ्चरात्रव्यवहारिणः ।
अत एव चाऽग्निपुराणे पञ्चरात्रपरिगणने पाशुपतादिपञ्चरात्राणि
पठितानि । यथा हयग्रीव उवाच—

प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया ।
व्यक्तानि मुनिभिर्लोके पञ्चविंशतिसंख्यया ॥
हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम् ।
वैभवं पौष्करं तन्त्रं प्राह्लादं गार्ग्यमा(९)लवम् ॥
नारदीयं च माण्डव्यं शाण्डिल्यं वैश्वकं तथा ।
सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरम् ॥
स्वायंभुवं कापिलं च तार्क्ष्यं नारायणीयकम् ।

---

(१) उत्सादनादि-इति क. ख. पुस्तकयोः पाठः ।
(२) कादाचित्कसिद्धि-इति क. ख. पुस्तकयोर्नास्ति ।
(३) शम-इत्यधिकः क० पुस्तके पाठः ।
(४) स्मृति-इति क. ख. पुस्तकयोर्नास्ति ।
(५) बाह्यचराणि-इति क. पुस्तके पाठः ।
(६) अनपेक्ष्यत्वं-इति क. ख. पुस्तकयोः पाठः ।
(७) उपाकृत्य-इति क० पुस्तके, उपाहृत्य- इति ख० पुस्तके ।
(८) चौरवम्-इति ख० पुस्तके ।
(९) लाघवम्-इति " " ।

आग्नेयं नारसिंहाख्यं(१) मानदाख्यं तथारुणम्॥
बौधायनं तथावार्ण(?)मित्युक्तस्तस्य(२)विस्तरः।

एतत्सर्वमाभिसन्धायाऽऽन्हिके पञ्चरात्रनिर्मूलत्वाभिधानं निर्मूलमिति श्रीदत्तोपाध्यायानां सिंहनादः। पञ्चरात्रपाशुपतादीन्यपि शास्त्राणि वेदाविरुद्धभागे प्रमाणमेवेति पारिजातश्चेति सकलाशिष्टानुमतार्थव्यवस्थापने कृतं बहुभिरावेशैरिति। एवमन्यान्यपि-'स्मृतिरिति शिष्टाः' इत्याद्युक्तप्रामाणिकनिबन्धेषु लिखितानि वाक्यानि ग्राह्याणि, महाजनपरिग्रहात्। षट्त्रिंशन्मतादीन्यपि तथेति केचित्। नेति कल्पतरुः।

अङ्गानि='शिक्षाव्याकरणनिरुक्तच्छन्दः कल्पज्योतिषाणि वेदाङ्गानि' इति देवलोक्तानि। शिक्षा=वेदाध्ययनेतिकर्तव्यताप्रतिपादको याज्ञवल्क्यपाणिनिपराशरादिग्रन्थः। व्याकरणं—'वृद्धिरादैच्' इत्यादि 'अ अ' इत्यन्तमष्टाऽध्यायीशास्त्रं पाणिनिप्रणीतमन्येषां वैदिकाऽव्युत्पादकत्वात्। निरुक्तं=यास्कप्रणीतो वैदिकपदार्थादिव्युत्पादको ग्रन्थः। छन्दः=गायत्र्यादिच्छन्दःप्रतिपादकं पिङ्गलप्रणीतं शास्त्रम्। कल्पः=ज्योतिष्टोमाद्यनुष्ठानपद्धतयः कात्यायनबौधायनादिप्रणीताः। ज्योतिः=ग्रहगत्यादिबोधकं होराशास्त्रमिति प्रसिद्धं गर्गादिप्रणीतम्।

एतैः पुराणादिभिर्मिश्रिता युक्ता वेदाः वैदिकयाज्ञिकानां मन्वादीनामभियुक्तानां वेद इति प्रसिद्धविषयाः शब्दाः, मन्त्राधिकरणन्यायात्। अपौरुषेयवाक्यत्वं वेदत्वमित्येके। मीमांसासिद्धपौरुषेयान्यजातीयव्याख्यानवाक्यत्वं तदिति कण्टकोद्धारः।

केचित्तु न्यायनिबन्धप्रकाशे 'कथात्वं जाति' रिति (३)वर्द्धमानचरणानां सोपपत्ति लिखनं पश्यन्तस्तादृशा 'वेदत्वं जाति'रिति परिष्कुर्वते। अखण्डोपाधिर्वेदत्वमिति तूच्छृङ्खलाः।

ते पुनश्चतुर्विधा 'ऋग्यजुःसामाथर्वाणो वेदाः' इति देवलादिभिर्विभज्य प्रतिपादिताः। तत्र ऋग्बहुलो वेदभाग ऋक्, यजुर्बहुलः स यजुः, सामबहुलस्तु साम। अदृष्टद्वारा दृष्टप्रयोजनक(४)कर्मप्रतिपादकवाक्यबहुलश्चाऽथर्वा। खिलशुक्रियौ त्वेतच्चतुष्टयान्तर्भूतावेव।

---

(१) नारसिंहं च-इति ख० पुस्तके।
(२) तथावर्णतमित्युक्तस्य,-इति क. पुस्तके, तथार्णमित्युक्तस्य-इति ख. पुस्तके.।
(३) वर्द्धमानेत्यादि-वेदत्वमिति तूच्छृङ्खला इत्यन्तो भागः ख० पुस्तके नास्ति।
(४) कर्मप्रयोजको वेदभागः खिलः इति ख० पुस्तके।

तत्राऽनिरुक्त इदानीमनुष्ठानप्रयोजको वेदभागः खिलः । शुक्लोक्तत्वेन ब्राह्मणे कीर्तितो वेदभागः शुक्लियः । आङ्गिरस्त्वथर्वैकदेश एवेति ।

अथैतेऽपि चत्वारो वेदाः प्रत्येकं द्विविधाः, मन्त्रब्राह्मणभेदात् । तत्र यानि प्रयोगकाले ऽनुष्ठानौपयिकार्थाभिधानरूपाणि वेदवाक्यानि तानि मन्त्रशब्देनोच्यन्त इति 'तच्चोदकेषु मन्त्राख्या' [जै० सू० २ । १।३२] इति मन्त्राधिकरणे व्यवस्थितम् । तत्रापि मन्त्रादीनां मन्त्रप्रसिद्धिरेव मन्त्रलक्षणं विवक्षिताविवक्षितविवेकेन पर्यवस्यति । अत एव प्रायिकमिदमभियुक्तप्रसिद्धलक्षणार्थं यत्राभियुक्तानां मन्त्रप्रसिद्धिः स मन्त्र इत्यर्थ इति पार्थसारथिमिश्राः । भगवान् जैमिनिरपि ऊहप्रवरनामधेयानां मन्त्रत्वनिरासाय 'अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्'[जै०सू०२।१।३४]इति मन्त्रप्रसिद्धिमेवोपलक्षयति।आहुश्च भट्टपादाः-

याज्ञिकानां समाख्यानं विज्ञेयं मन्त्रलक्षणमिति ।

अत्र मन्त्रेत्युपलक्षणमिति ब्राह्मणस्य ऋग्यजुःसामादीनां सूक्तानुवाकादीनां चेत्थमेव लक्षणं निरवद्यम् । सम्भवप्राचुर्यात्तु लक्षणान्तराण्यभिधीयन्त इति मन्त्रभागातिरिक्तो वेदभागो ब्राह्मणम्, यदाह—'शेषे ब्राह्मणशब्दः' [जै० सू० २ । १ । ३३]। मन्त्रवाक्यावशिष्टं वेदवाक्यं ब्राह्मणमित्यर्थः । मन्त्रा अपि ऋचो यजूंषि सामानि निगदा मन्त्रा इति कात्यायनेन विभक्ताः । यत्राऽर्थवशेन पादव्यवस्था स मन्त्र ऋक् । यदाह–'तेषामृग्यत्राऽर्थवशेन पादव्यवस्था'[जै० सू० २ । १ । ३५] । नियताक्षर(१)मन्त्र ऋगिति पर्यवसितार्थः । अनीयमानत्वं चाऽत्र विशेषणमर्थादन्यथा सामन्यतिप्रसङ्गात् । अनियताक्षरावसानो मन्त्रः पुरस्कृतगानो यजुः । इदन्तु नान्तरीयकतया कटाक्षयन्नेव यजुर्लक्षणमाह–'शेषे यजुःशब्दः'[जै० सू० २ । १ । ३७]। ऋक्सामभ्यां यदन्यत्प्राश्लिष्टपाठितं तद्यजुः । गीयमानो मन्त्रः साम। यद्यपि गीतमेव सामशब्दार्थत्वेनाऽसिद्धान्तयत् सप्तमेऽध्याये। तथाहि—'रथन्तरेण स्तुवीत' इत्यादिदर्शनादक्षरेषु तद्व्यपदेशः । एवं च मन्त्रविभागप्रकरणे सामशब्दस्य गीयमानाक्षरपरतामेवाऽभिप्रयन्नसूत्रयत् । 'गीतिषु सामाख्या [जै० सू० २ । १ । ३६]। अक्षरपरतया कथंचित्सूत्रयोजनादिति । निगदास्तु 'प्रोक्षणीरासाद-

---

(१) एतदग्रे—पादावसानो—इति ख. पुस्तके ।

यति' इत्येवमादयः परसम्बोधनरूपा मन्त्राः । निगदाधिकरणे 'निगदो वा चतुर्थं स्याद्धर्मविशेषात्'[जै० सू० २ । १ । ३८]इत्याक्षिप्य यजुर्विशेषा एवेत्यासिद्धान्तयत् । अत एव—'अहेर्बुध्निय मन्त्रं मे गोपाय, यंसृपंयस्त्रयीविदो विदुः । ऋचः सामानि यजूँषि' इति श्रुतौ त्रिधैव मन्त्रः कथितो यद्यपि, तथापि 'उपांशु यजुषा, उच्चैर्निगदेन' इत्यादौ विशेषसंज्ञापुरस्काराद्यजुर्विशेषप्रदर्शनाय निगदाः कात्यायनेन पृथगुपात्ता इति मन्तव्यम् । ब्राह्मणन्तु द्विविधं, विध्यर्थवादभेदात् । परकृतिपुराकल्पौ त्वर्थवादान्तर्भूतावेव । तत्र विधिश्चतुर्धा—उत्पत्तिविनियोगप्रयोगाऽधिकारभेदात् । विध्यन्तराविषयपदार्थस्वरूपप्रतिपादकोऽपि विधिरुत्पत्तिविधिराद्यप्राप्तेरुत्पत्तित्वात् । तत्र चाऽस्य शब्दान्तराभ्यासगुणसङ्ख्यानामधेयप्रकरणाख्यानि षट् सहकारीणि । अथ 'अग्निष्टोमेन यजेत' इत्यादिपरा(१)र्थ्यरूपशेषत्वबोधको विधिर्विनियोगविधिः। नियोगे चास्य 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या रूपाणि षट् सहकारीणि । फलस्वामित्वरूपाधिकारबोधको विधिरधिकारविधिः । यथा 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इत्यादिः । साङ्गप्रधानस्य युगपत्कर्तव्यताबोधको विधिः प्रयोगविधिः । करणानुगृहीतप्रत्येकविधिविनियुक्तप्रयाजादीनामष्टदोषदुष्टविकल्पसमाधानाय सर्वाङ्गोपेतप्रधानकर्तव्यतां बोधयन् प्रधानविधिरेव प्रयोगविधिरित्युच्यते । यथा 'ज्योतिष्टोमेन यजेत' इत्येवमादिरेवेत्याकाराद्विवक्तव्यम् । उत्पत्तिविधिस्त्रिविधः, कर्ममात्रोत्पादकः 'अग्निहोत्रं जुहोति' इत्येवमादिः । गुणविशिष्टकर्मोत्पादकः 'सोमेन यजेत' इत्येवमादिः । गुणमात्रोत्पादको 'द(२)ध्ना जुहोति' इत्येवेति । विनियोगविधिरपि त्रिधा—पूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति । यदाहुः—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चाऽन्यत्र च प्राप्तौ परिसङ्ख्येति कीर्त्यते ॥

तत्राद्यो 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इत्यादिः । द्वितीयो 'व्रीहीनवहन्ति' इत्यादिः । तृतीयः 'अश्वाभिधानीमादत्ते' इत्यादिः । भाष्ये तु 'पञ्च पञ्चनखा भक्ष्याः' इति तृतीयोदाहरणं प्रकृतकारि-

(१) परार्थ्य—इति ख. पुस्तके ।
(२) दध्नाऽग्निहोत्रं जुहोति—इति क. पुस्तके पाठः ।

कांविस्तरभयान्न विव्रियते इति । अर्थवादास्तु स्तुतिनिन्दारूपाः । तत्राद्यो 'वायुर्वै क्षेपिष्ठा देवता'इत्यादिः । द्वितीयस्तु 'न तस्याऽऽहुतिमभ्यवहरन्ति य उदिते जुहोति' इत्यादिरित्याद्यन्यत्राऽनुसन्धेयमित्यास्तां प्रसक्तानुप्रसक्तिविस्तरः । पुराणादीनामुपसर्जनीकरणं वेदानां प्राधान्यसूचनाय । विद्यानां=पुरुषार्थसाधनज्ञानानाम् । अत एव धर्मस्याऽपि स्थानान्युपायाः विद्यायाः प्रवृत्तिद्वारा धर्मप्रयोजकत्वात् । यद्यप्यन्यत्राऽष्टादश विद्यास्थानान्युक्तानि । तथा च विष्णुपुराणम् ।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थं(१)च विद्या ह्यष्टादश स्मृताः ॥

तथापीह वेदशब्देनोपवेदरूपाणामायुर्वेदादीनां ग्रहणात् न न्यूनतेति बोद्धव्यम् । तेषां विद्यास्थानत्वेऽपि न धर्मस्थानत्वं धर्मे तात्पर्याऽभावादित्यप्याहुः । यत्तु ब्रह्मपुराणम्—

वेदान्तः पञ्चदशमं विद्या षोडशकं भवेत्-इति ।

तत्र वेदान्तः=शारीरकम् । विद्या=बृहदारण्यकादिरहस्यम् । ते चाऽत्र मीमांसावेदपदाभ्यामेव गृहीते इति सर्वं चतुरस्रम् ॥ ३ ॥

(मिता०) 'शौचाचारांश्च शिक्षयेत्'इत्याचार्यस्य धर्मशास्त्राध्यापनविधिः । शिष्येण तदध्ययनं कर्तव्यमिति कुतोऽवगम्यत इत्यत आह—

पुराणेति । पुराणं ब्राह्मादि । न्यायस्तर्कविद्या । मीमांसा वेदवाक्यविचारः । धर्मशास्त्रं मानवादि । अङ्गानि व्याकरणादीनि षट् । एतैरुपेताश्चत्वारो वेदाः । विद्याः (२)पुरुषार्थसाधनानि । तासां स्थानानि च चतुर्दश । धर्मस्य च चतुर्दश स्थानानि हेतवः । एतानि च त्रैवर्णिकैरध्येतव्यानि(३)तदन्तर्भूतत्वाद्धर्मशास्त्रमप्यध्येतव्यम् । (४)तत्रैतानि ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाऽधिगन्तव्यानि । क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय । तथाच शङ्खेन विद्यास्थानान्युपक्रम्योक्तम्—

---

(१) तु-इति ख० पुस्तके ।
(२) पुरुषार्थज्ञानानि क० पुरुषार्थसाधनज्ञानि ख० ।
(३) तदन्तर्गतत्वात् क० ।
(४) तत्र ब्राह्मणेनैतानि क० ।

'एतानि ब्राह्मणो ऽधिकुरुते स च वृत्तिं दर्शयतीतरेषाम्'इति। मनुरपि द्विजातीनां धर्मशास्त्राध्ययनेऽधिकारो ब्राह्मणस्य प्रवचने नान्यस्येति दर्शयति (२। १६), (१। १०३)—

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य(१) कर्हिचित्॥
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित्॥ इति॥ ३॥

(वी०मि०)धर्मशास्त्रस्य प्रयोजनवत्त्वेऽपि प्रकृते किमायातमित्याशङ्क्य स्वसंहितायां धर्मशास्त्रत्वं दर्शयितुं तद्व्यवस्थाये धर्मशास्त्रप्रणेतॄनाह—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमाऽऽपस्तम्बसंवर्ताः कात्यायनबृहस्पती॥ ४॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वसिष्ठश्च धर्मशास्त्रम(२)योजकाः॥ ५॥

उशन इत्यन्तमेकभावी द्वन्द्वः। प्रयोजकाः प्रणेतारः। वसिष्ठश्चेति चो ऽनुक्तसमुच्चये, तेनाऽन्येषामपि ग्रहणम्॥

तथा च शंखलिखितौ-स्मृतिर्धर्मशास्त्राणि तेषां प्रणेतारो मनुविष्णुयमदक्षाङ्गिरोऽत्रिबृहस्पत्युशनआपस्तम्बवसिष्ठकात्यायनपराशरव्यासशङ्खलिखितसंवर्तगौतमशातातपहारीतयाज्ञवल्क्यप्रचेतसादयः शिष्टाः।

मनुर्बृहस्पतिर्दक्षो गौतमो ऽथ यमो ऽङ्गिराः।
योगीश्वरः प्रचेताश्च शातातपपराशरौ॥
संवर्त्तौशनसौ शङ्खलिखितावत्रिरेव च।
विष्ण्वापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः॥
एते ह्यष्टादश प्रोक्ता मुनयो नयतत्त्वताः।
जाबालिर्नाविकेतश्च स्कन्दो लौगाक्षिकाश्यपौ॥
व्यासः सनत्कुमारश्च सुमन्तुश्च पितामहः।
व्याघ्रः काण्यर्याजिनिश्चैव जातूकर्णः कपिञ्जलः॥

---

(१) कस्याचित्०क० ख०। (२) प्रवर्तकाः-इति क० पुस्तके।

बौधायनश्च काणादो विश्वामित्रस्तथैव च ।
पैठीनसिर्गोभिलश्च उपस्मृतिविधायकाः ॥

तथा—

वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहः ।
वभ्रुः काष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः ॥
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः ।
आत्रेयः छागलेयश्च मरीचिर्वत्स एव च ॥
पारस्करऋष्यशृङ्गौ वैजवापस्तथैव च ।
इत्यन्ये स्मृतिकर्तार एकविंशतिरीरिताः ॥
एभिर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा ।
तान्येतानि प्रमाणानि न हन्तव्यानि हेतुभिः ॥

अत्र मन्वादिभिरष्टादशभिः प्रणीताः स्मृतयः,जाबाल्यादिभिरष्टादश(१)भिस्तु प्रणीता उपस्मृतय इत्यवान्तरविभागवत्योऽपि भविष्ये—

मन्वादिस्मृतयो याश्च षट्त्रिंशत्परिकीर्तिताः ।

इति सामान्येनैवोक्ताः । वसिष्ठाद्येकविंशतिप्रणीतास्तु 'तथा स्मृत्यन्तरेषु च'इत्यनेनोक्ताः । वृद्धमनुवृद्धवसिष्ठवृद्धशातातपलघुहारीतयोगियाज्ञवल्क्यादयस्त्ववस्थाभेदेन सविशेषणसंज्ञाव्यपदेशभाजो मन्वादय एवेति न पृथगुक्ताः । एवञ्च(२)याज्ञवल्क्यप्रणीतत्वात्स्वकृतसंहिता धर्मशास्त्रमिति दर्शितम् ॥ ४ ॥ ५ ॥

(मिता०) अस्तु धर्मशास्त्रमध्येतव्यं, याज्ञवल्क्यप्रणीतस्याऽस्य शास्त्रस्य किमायातमित्यत आह—

मन्वत्रीति । पाराशरेति च । उशनःशब्दपर्यन्तो द्वन्द्वैकवद्भावः । याज्ञवल्क्यप्रणीतमिदं धर्मशास्त्रमध्येतव्यमित्याभिप्रायः । नेयं परिसंख्या(३) किन्तु प्रदर्शनार्थमेतत् । अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम् । एतेषां प्रत्येकं प्रामाण्येऽपि साकाङ्क्षाणामाकाङ्क्षापरिपूरणमन्यतः क्रियते । विरो(४)धे विकल्पः ॥ ४ ॥ ५ ॥

---

(१) अष्टादशभि-इति क० पुस्तके नास्ति ।
(२) च-इति ख० पुस्तके नास्ति ।
(३) परिसंख्या नाम एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनम् । एतद्विस्तरोऽस्मे श्लोकमिताक्षरायां द्रष्टव्यः ।
(४) विरोधे तु ख. ।

(वी० मि०) इदानीं धर्मस्य साक्षाद्धेतून् देशादीन् प्रदर्शयन्नेव स्वरूपमप्याह—

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ॥
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥ ६ ॥

देशः—कुरुक्षेत्रादिः। कालः—सूर्योपरागादिसमयः। उपायः—इतिकर्तव्यता। द्रव्यं—हिरण्यादि। श्रद्धा—वैदिककर्मणि फलावश्यंभावनिश्चयः, तया सम्यक् हेतुभावेनाऽन्वितं यथा स्यात्। पात्रं—श्रोत्रियादि वक्ष्यमाणम्। सप्तमी चेह चतुर्थ्यर्थे। प्रदीयत इति दानं ससम्प्रदानक—स्त्यागः, स्वस्वत्वध्वंसपरस्वत्वोत्पत्तिफलको विक्रयादिव्यावृत्त इच्छाविशेषो वा। तत्र प्रकर्षः प्रत्युपकारादिप्रतिसन्धानराहित्यं जातिगुणादिरूपदानोपयोगि तत्तन्निमित्तसाचिव्यञ्च। अत्र(१)दानं चतुर्षु धर्मचरणेषु युगचतुष्टयावस्थायित्वेन प्राधान्यादुदाहरणम्। शास्त्रदेशित-तत्तत्स्वकारकसंवलितानां यागहोमादीनां सर्वेषामुपलक्षणम्। यदिति देशादिरूपकारकविशिष्टक्रियापरामर्शः। तदिति यच्छब्दाऽव्यवहितोत्तरस्थस्य तच्छब्दस्य 'यत्तदूर्ज्जितम्' (वे०सं०१।१३) इत्यादाविवोत्सर्गतः प्रसिद्धपरामर्शकत्वेऽपि 'मयि क्रूरे यत्तत्साविषयमिव' इत्यादाविव तदपवादेन यच्छब्दानिर्दिष्टार्थनिर्देशतैवेति स्मर्तव्यम्। सकलं—सम्पूर्णम्। धर्मलक्षणं—तत्स्वरूपं शास्त्रदेशितसम्पूर्णफलसम्पादकत्वात्। देशाद्येकैकादिरहितं तु विफलं विफलतरं विफलतमं, तादृक्फलासाधकत्वादित्याशयः। एवञ्च यागादिरूपो धर्मो यद्यदङ्गविशिष्टो विध्युपदिष्टः तत्समुच्चयं वाऽनुष्ठेयः। अङ्ग(२)नां विरोधे नैराकांक्ष्ये च विकल्पः, अनन्यगतिकत्वादनाकाङ्क्षिताऽनन्वयाच्च। यदाहुः—
विरोधे तु विकल्पः स्यात् इति।

स्मृतिशास्त्रविकल्पस्तु आकाङ्क्षापूरणे सति। इति च।

परन्त्वावश्यके कर्मणि शक्यानामेव काम्ये तु सर्वेषामङ्गानामुपसंहारः। सर्वशक्तिनयात्सङ्कल्पितं काम्यमपि नित्यवदेव। यत्र तु काम्ये अङ्गवैगुण्येऽपि कुतश्चिन्निमित्तात्सम्पूर्णफलता

---

(१) अन्नदानम् इति ख. पुस्तके पाठः।
(२) अङ्गानि—इति ख. पुस्तके पाठः।

ऽल्पफलता वा शास्त्रे देशिता तत्र तदर्थिना तादृगेवाऽऽचरणीय-
यमिति विवेकः ॥ ६ ॥

(मिता०) इदानीं धर्मस्य कारकहेतूनाह—

देश इति । देशो यस्मिन्देशे मृगः कृष्ण इत्युक्तलक्षणः । कालः सङ्क्रान्त्यादिः । उपायः शास्त्रोक्तेतिकर्तव्यताकलापः । द्रव्यं प्रतिग्रहादिलब्धं गवादि । श्रद्धा आस्तिक्यबुद्धिस्तदन्वितं यथा भवति तथा । पात्रं न विद्यया केवलयेत्येवमाविक्ष्यमाणलक्षणम् । प्रदीयते यथा न प्रत्यावर्तते तथा परस्वत्वापत्त्यवसानं त्यज्यते । एतद्धर्मस्योत्पादकम् । किमेतावदेव नेत्याह—सकलमिति । अन्यदपि शास्त्रोक्तं जातिगुणहोमयागादि तत्सकलं धर्मस्य कारकं, जातिगुणद्रव्यक्रियाभावार्थात्मकं चतुर्विधं धर्मस्य कारकमित्युक्तं भवति । तच्च समस्तं व्यस्तं वा यथाशास्त्रं द्रष्टव्यम् । श्रद्धा सर्वत्रानुवर्तत एव ॥ ६ ॥

(वी० मि०) सम्प्रति पुराणादिभ्यः पूर्वोक्तेभ्यो निष्कृष्य प्रधानीभूतं धर्मे प्रमाणं(१) दर्शयन्नेव प्रदीयत इत्यनेन कर्ममात्रोपलक्षणे लौकिकभोजनादेरपि धर्मरूपतामसर्कं व्युदसितुमुपलक्ष्यतावच्छेदकं धर्मलक्षणमि(२)त्याह—

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥
सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्॥ ७ ॥

श्रुतिर्वेदः । स्मृतिर्धर्मशास्त्रम् । यदाह मनुः—

श्रुतिश्च (३)वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः ।

सदाचारः ।

साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥

इति विष्णुपुराणे दर्शितः । आचरणमलौकिकं तेन लौकिकभोजनादिव्युदासः । स्वस्य प्रियं प्रीतिः कारणेन कार्यलक्षणात्, धर्मसन्देहे वैदिकसंस्कारवासितात्मनामेकत्र पक्षे मनःपरितोष इति यावत् ।

(१) प्रधाने—इति क. पुस्तके पाठः ।
(२) मप्याह— इति ख. पुस्तके ।
(३) स्तु—इति ख. पुस्तके पाठः ।

यदाहुर्भट्टपादाः—

एतेन वैदिकानेकधर्मश्रीसंस्कृतात्मनाम् ।
आत्मतुष्टेः प्रमाणत्वं सिद्धं धर्मप्रसिद्धये ॥ इति ।

आत्मन इति न तु सर्वस्य । एतच्चैकदेशभू(१)मतेऽपि धर्मेऽन्वितं योग्यताबलात् । सम्यक् सङ्कल्पात् रागद्वेषादिरहितात् ज्ञा(२)नात् जातः कामो ब्राह्मणोपचिकीर्षादिः ।

अद्रोहः सर्वभूतानां कर्मणा मनसा गिरा ।
अनुग्रहश्च ज्ञानञ्च शीलमेताद्विदुर्बुधाः ॥

इति महाभारतादौ शीलपरिगणनेऽनुग्रहादिशब्देनोक्तः । इदम्-एते । मूलमिति विधेयलिङ्गसङ्ख्याग्रहणात् तच्च पञ्चस्वन्यापेक्षया प्रधानीभूतेष्वपि श्रुत्यादिषु एकस्य श्रुतिरूपस्य प्रमाणस्याऽतिप्राधान्यसूचनाय धर्ममूलं धर्मे प्राधान्येन प्रमाणम् । प्राधान्यं च साक्षाद्बोधकतया । तथा च मनुः—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

साक्षात् श्रुत्यनुग्राहकतया लक्षणं प्रमाणम् । यद्यपि—

वेदो ऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

इति मनुनैव शीलमप्यधिकमुक्तं तथाऽपि (३)तस्याऽद्रोहादिरूपस्य भारतोक्तस्य ब्रह्मण्यता देवपितृभक्तता सौम्यता ऽपरोपतापिता ऽनसूयता मृदुता ऽपारुष्यं मित्रता प्रियवादिता कृतज्ञता शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलमिति । ब्रह्मण्यतादेः हारीतोक्तस्य च शीलस्याऽऽचार एवान्तर्भावान्नाऽत्र पृथगुक्तम् । देवभक्तता पितृभक्तता चेति द्वे । प्रायः परोपकारपर्यवसायितया ऽऽचारान्तरादभ्यर्हितत्वेन वचनान्तरे 'गोवलीवर्द' न्यायाद्भेदेनोपन्यस्तम् । एवं सम्यक् सङ्कल्पजः काम इति प्रकृतवाक्येऽपि बोद्धव्यम् । तत्र च (४)श्रुतिरग्निहोत्रादौ । स्मृतिरन्वेष्टकादौ । आचारो होलकादौ । आत्मतुष्टि-

---

(१)भूपतेऽपि—इति क०ख० पुस्तकयोः पाठः ।
(२) जनात्-इति क० पुस्तके पाठः ।
(३) अपि-इत्यधिकं ख० पुस्तके ।
(४) च-इति क. पुस्तके नास्ति ।

रभ्यासादि(१)सन्देहविषयप्रायश्चित्तव्रतादौ । तथा च प्रायश्चित्तप्रकरणे बृहस्पतिः—

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम् ।
तस्मिँस्तावत्पुनः कुर्याद्यावत्तुष्टिकरं भवेत् ॥ इति ।

अलाघवं पापशून्यताप्रतिसन्धानविरहः, तन्निबन्धनोऽपरितोष इति यावत् । अव्यवस्थितविकल्पविषयप्राङ्मुखोदङ्मुखाचमनादाविव मनस्तुष्टिः स्वविषये ऽन्यतरस्मिन् धर्मे प्रमाणमिति बहवः । तुष्टिस्तु यस्य तस्यैव धर्मे प्रमाणमित्युक्तम् । कामस्तु प्रत्यक्षश्रुत्याद्यवोधिते ब्राह्मणोपकार (२)विशेषादौ भोजनव्यतिरेकेण मया जलपानं न कर्तव्यमित्याद्याकारस्तदकरणादाविति तु विश्वरूपः । अत्र पुराणादीनां स्वर्गादिकथाप्राधान्यादितिहासबहुलत्वेनाऽर्थवादादिरूपतया न्यायमीमांसयोस्तर्कद्वारा शिक्षादीनामङ्गानां तत्तदुपकारसम्पादनेन वेदाऽनुग्राहकतया धर्मे प्रामाण्यं न साक्षादिति न तान्यत्र गणितानि । स्मृत्यादयस्तु श्रुतिमनुमापयन्तो ऽपि तामननुगृह्णन्त एव धर्मे प्रमाणमिति तेषामत्र ग्रहणमिति विवेक्तव्यम् । एवं श्रुतिप्रमाणकधर्मस्य लक्षणमपि दर्शितम् । (३)स्मृत्यादिमूलकस्याऽपि धर्मस्याऽवश्यापेक्षितवेदप्रमाणकत्वात् । सर्वेषां वेदानां मुख्यतो धर्म एव तात्पर्यपर्यवसानेन तत्रैव प्रामाण्यात् । 'चोदनालक्षणोऽर्थो धर्मः'(जै० सू० १।१।२) इति सूत्रे तु कलञ्जभक्षणादेरधर्मस्यापि चोदनालक्षणत्वमङ्गीकृत्याऽर्थपदेन वारणं कृतमित्यवधेयम् ॥ ७ ॥

(मिता०) इदानीं धर्मस्य ज्ञापकहेतूनाह—

श्रुतिरिति । श्रुतिर्वेदः । स्मृतिर्धर्मशास्त्रम् । तथा च मनुः (२।१०) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः इति । सदाचारः सतां शिष्टानामाचारोऽ(४)नुष्ठानम् । स्वस्य चात्मनः प्रियं, वैकल्पिके विषये यथा 'गर्भाष्टमेऽष्टमे वाब्दे' इ(५)त्यादावात्मेच्छैवनियामिका ।

---

(१) अभ्यासाऽनभ्यासादि-इति ख० पुस्तके पाठः ।
(२) ब्राह्मणोकार-इति क० पुस्तके, ब्राह्मणोपरोपकार-इति तु ख० पुस्तके पाठः ।
(३) श्रुत्यादि-इति ख० पुस्तके ।
(४) नुष्ठानं नाशिष्टानाम् ख० ।
(५) इत्यत्रात्मेच्छैव, इत्यादिष्वात्मेच्छैव ख० ।

सम्यक्संकल्पाज्जातः कामः शास्त्राविरुद्धो (१)यथा-'मया भोजनव्यतिरेकेणोदकं न पातव्यम्' इति। एते धर्मस्य मूलं प्रमाणम्। एतेषां विरोधे पूर्वपूर्वस्य बलीयस्त्वम् ॥ ७ ॥

(वी० मि०) नन्विदं धर्मलक्षणमात्म(२)तत्त्वसाक्षात्कारेऽतिव्यापकम्। न च सोऽपि धर्म एव यागादीनामिव कर्मकाण्ड एव व्युत्पादनप्रसङ्गादित्याशङ्क्याह—

इज्याऽऽचारदमाहिंसादानस्वाध्यायकर्मणाम् ॥
अयन्तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम् ॥ ८ ॥

इज्या-यागः। आचारः-आह्निकादिः। दमः-इन्द्रियनिग्रहः। अहिंसा-विहितातिरिक्तहिंसाविरहः। दानम्-उक्तम्। स्वाऽध्यायः-वेदाऽध्ययनम्। कर्म-इज्याद्यतिरिक्तं होमादि, 'गोबलीवर्द'न्यायात् पृथगुक्तम्। तेषां मध्ये योगेनाऽष्टाङ्गेन तु मनःसन्निकर्षमात्रेण यदात्मदर्शनम्-आत्मतत्त्वसाक्षात्कार इति फलितार्थः। सोऽयं परमो धर्मः। 'पवनाग्निसमागमो ह्यं सहितं ब्रह्म यदस्त्रतेजसा'(रघु०८।४) इत्यादौ प्रक्रम्यमानलिङ्गस्याऽपि प्रक्रान्तलिङ्गस्येव सर्वनाम्ना ग्रहणदर्शनान्न लिङ्गाऽसङ्गतिः। क्वचिद(३)यं त्विति पाठः। तत्र तुशब्दः कर्मणामित्यनन्तरं योज्यः, तेन-

तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च।
युगपत्त्रितयाऽभ्यासाज्जीवन्मुक्तिर्दृढा भवेत् ॥

इत्युक्ताभ्यासावच्छेदः। तस्य तत्त्वसाक्षात्कारादप्युत्कर्षाद्य(४)थाश्रुतक्रमे कर्मणामिति निर्द्धारणषष्ठ्येव। तुशब्दस्य गतार्थत्वादित्यवधेयम्। यद्वा कर्मणामिति शेषषष्ठी इज्यादिकर्मसम्बन्धितान्निमित्तकमात्मदर्शनमित्यर्थः। 'तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेन' इत्यादिश्रुतेः। परमत्वं त्वात्मदर्शनस्य। सकलप्रयोजनमौलिभूतमोक्षान्तरङ्गत्वादिज्यादीनामपि तादर्थ्यात्तत्तदवान्तरफलस्य स्वर्गादेरानुषङ्गिकत्वात्। तथा चैतेनोत्कर्षेणेज्यादिधर्मै-

---

(१) शास्त्राविरुद्धः कामो यथा ख०।
(२) वत्त्व-इति क० पुस्तके पाठः।
(३) क्वचिदयात्विति-इति ख० पुस्तके पाठः।
(४) तथा-इति ख० पुस्तके पाठः।

भ्यो नि[१]ष्कृष्य धर्मरूपस्यात्मदर्शनस्य ज्ञानकाण्डे ऽभिधानमिति सर्वं चतुरस्रम् । क्वचित्तु कर्मणामित्यत्र कर्म वेति । स इत्यत्र चेति पठितं व्याख्यातं च धर्मस्वरूपमाह—इज्येति प्रदर्शनमात्रमेतत् । तेन वैदिकं सर्वं धर्मधर्मः, आत्मदर्शनञ्च प्रकृष्टो धर्म इति । देशे काल इत्यादिवचनं तु धर्मकारकप्रदर्शनमात्रपरतयैवाऽवतारितमिति तदनञ्जसम् ॥ ८ ॥

(मिता०) देशादिकारकहेतूनामपवादमाह—

इज्येत्यादि । इज्यादीनां कर्मणामयमेव परमो धर्मः, यद्योगेन वाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं याथातथ्यज्ञानम् । योगेनात्मज्ञाने देशादिनियमो नास्तीत्यर्थः । तदुक्तं 'यत्रैकाग्रता तत्राविशेषात्' इति पातञ्जले ॥ ८ ॥

(वी० मि०) ननु श्रुतिः स्मृतिः सदाचार इत्यादिधर्मप्रमाणगणनं नूनं धर्माऽधर्मसन्देहस्थले तन्निर्णायकत्वेन बहुशः शास्त्रबोधितस्य पर्षदादिवचनस्याऽनभिधानादित्याऽऽशङ्क्य शिष्टविशेषसमुदायादिरूपं पर्षदादिस्वरूपं प्रदर्शयन्नेव [२] न केवलं सदाचारशब्देन शिष्टानां कायक्रियैवाऽत्राऽभिप्रेता किन्तु नामवचनमपीति न न्यूनत्वमित्यभिप्रयन्नाह—

चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा(३) ।
सा ब्रूते यं स धर्मः स्यादेको (४)वाऽध्यात्मवित्तमः ॥९॥

वेदा—ऋगादयः । धर्मा—धर्मशास्त्राणि । तज्ज्ञाश्चत्वारः पर्षत् । ते च ब्राह्मणा ग्राह्याः । तथा च मनुः—

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥

तिस्रो विद्या वेदा येषान्ते त्रिविद्याः तेषां समूहस्त्रैविद्यं भिक्षादित्वादण् तद्वा पर्षत् । तथा च मनुः—

---

(१) निटस्य—इति ख० पुस्तके ।
(२) च—इति ख० पुस्तके नास्ति ।
(३) च—इति क० पुस्तके ।
(४) एकोऽप्यध्यात्मवि—इति क० ख० पुस्तकयोः पाठः ।

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।
त्रयवरा परिषत् ज्ञेया धर्मसंशयनिर्णये॥

त्रयोऽवराश्चरमः पक्षो यस्यां सा। एतेन संख्यान्तरमपि सूचितम्।

(१)तथा चाऽङ्गिराः—

एकविंशतिसंख्यातैर्मीमांसान्यायपारगैः।
वेदार्थकुशलैश्चैव परिषत्त्वं प्रकल्पयेत्॥

मनुः—

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः।
त्रयश्चाऽऽश्रमिणः पूर्वे परिषत्स्याद्दशावरा॥

त्रैविद्यस्त्रयीवेत्ता। हैतुकोऽनुमानज्ञः। तर्की सत्तर्कक्षुण्णमतिः। तथा च मनुः-

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः॥

नैरुक्तो निरुक्तज्ञः। धर्मपाठको धर्मशास्त्राभिज्ञः प्रायश्चित्तादिनिर्देष्टा-यमनुवादक इति लोका वदन्ति पठन्ति च—

वेदविद्याव्रतस्नातः सत्यसन्धो जितेन्द्रियः।
अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः॥

पूर्वे ब्रह्मचारिगृहस्थवानप्रस्थाः एते च कल्प्याः कार्यलाघवगौरवयोः गुणप्रकर्षनिष्कर्षयोश्च तारतम्येन व्यवस्थाप्याः। सर्वे (२) चेदं प्रदर्शनार्थम्। यावद्भिर्यत्र धर्मनिरूपणं सम्भवति तावद्भिस्तत्र परिषत्। अत एव यमः-

एको द्वौ वा त्रयो वापि यद् ब्रूयुर्धर्मपाठकाः।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः॥

इत्यास्तां विस्तरः। प्रकृतमाह सा पर्षत् यं धर्मं इति ब्रूते स धर्मः। अध्यात्मवित्तमः-आत्मानमधिकृत्य प्रवृत्तं शास्त्रमध्यात्मं तद्विदां श्रेष्ठः आत्मतत्त्वसाक्षात्कारवानिति यावत्। एकोऽपि यं ब्रूत इत्याद्यनुषञ्जनीयम्। पर्षदादिवचनमिव 'स्त्रीभ्य(३)श्चावरवर्णेभ्यो धर्मशेषान् प्रतीयात् इत्येक इत्येके' (आप० ध० सू० २। २९। १५) इत्यक

(१) यथा-इति क० पुस्तके।
(२) वेदं-इति क. पुलस्के।
(३) स्त्रीभ्यस्सवर्णेभ्यश्च-इति 'मयसूरराजकीयसंस्कृतपुस्तकमाल।'मुद्रितपुस्तके पाठः।

इत्यापस्तम्बोक्तस्त्रीशूद्राद्याचारोऽपि वेदाद्यविरुद्धः परम्पराप्राप्तः सदाचारश(१)ब्देनैव सङ्गृह्यः । एकः-इत्यनेनाऽन्यादृशतदाचारेऽस्वरसः सूचितः । न च स्त्र्यादीनां निरुक्तसत्त्वाभावात् शास्त्रविरोधश्च(२) कथमेवमिति वाच्यं, क्षीणदोषत्वेन प्रकृतार्थे भ्रान्तेरुपलक्षणात् । अन्यथेदानीन्तनानां प्रायशोऽव्यापनात् । शास्त्रविरोधश्च सर्वथैव सदाचारेपूपसंहर्तव्यः । अन्यथेन्द्रकृताहल्यासङ्गमादेव (३)शिष्टकृताक्षमालोपयमा[४] देश्च धर्मे प्रामाण्यापत्तेः । अत एव महाभारते—

कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा ।
न चरेत्तानि धर्मात्मा श्रुत्वा चापि न कुत्सयेत् ॥

इत्यास्तामतिविस्तरः ॥ ९ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसुनुश्रीमन्महाराज चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकर श्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मज श्रीपरशुराममिश्रसूरिसूनुसकलविद्यापारावारपारीणधुरीणश्रीमन्मित्रमिश्रकृते श्रीवीरसिंहमित्रोदयाख्याने श्रीयाज्ञवल्क्यव्याख्याने उपोद्घातप्रकरणम् ॥ १ ॥

(मिता०) कारकहेतुषु ज्ञापकहेतुषु वा सन्देहे निर्णयहेतूनाह—

चत्वार इति । चत्वारो ब्राह्मणाः वेद(५)धर्मशास्त्रज्ञाः पर्षत् । तिस्रो विद्या अधीयन्त इति त्रैविद्यास्तेषां समूहस्त्रैविद्यम् । धर्मशास्त्रज्ञत्वमत्राऽप्यनुवर्तते तद्वा पर्षत् । सा पूर्वोक्ता पर्षत् यं ब्रूते स धर्मः । अध्यात्मज्ञानेषु निपुणतमो धर्म(६)शास्त्रज्ञश्च एकोऽपि वा यं ब्रूते सोऽपि धर्म(७) एव ॥ ९ ॥

इत्युपोद्घातप्रकरणम् ।

—:※:—

(१) धर्मेणैव-इति क. पुस्तके । (२) शास्त्रविरोधश्च-इति क. पुस्तके नास्ति ।
(३) र्षा इति क. पुस्तके । (४) सा—इति क. पुस्तके. ।
(५) वेदशास्त्रधर्मज्ञाः ख. (६) वेदधर्मशास्त्रज्ञश्च ख. (७) सोपि धर्मः ख.

अथ ब्रह्मचारिप्रकरणम् २

(वी०मि०) अथ वर्णधर्मेषु वक्तव्येषु वर्णानाह—

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ॥
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥ १० ॥

ब्रह्म=ब्राह्मणः । क्वचिद्द्विप्रेतिपाठः । कर्माधिकारिविभागाय द्विजान् विविनक्ति-'त्वाद्यास्त्रयो द्विजाः'-अत्र तुशब्दस्य वर्णा इत्युत्तरं पाठात् स्वरूपस्य आद्या इत्यनन्तरं योजनादर्थस्य सङ्गतिः । तेषामाद्यास्तु त्रयो द्विजाः द्विर्जायन्त इति व्युत्पत्तेः । तथा च वक्ष्यति-मातुर्यदग्र इत्यादि (१।३९') । अत्र वृत्तीनामनभिव्यक्तलिङ्गसङ्ख्यत्वात् ब्राह्मणाश्च क्षत्रियाश्चेत्यादिविग्रहेऽपि प्रकृतसमासोपपत्तेराद्या इत्यनेन ब्राह्मणा एवोक्ता इति भ्रमनिरासाय त्रय इत्युक्तम् । वर्णा इत्यनुषङ्गेऽपि त(१)न्निरासात् । तत्र च ब्रह्मव्यक्तिषु तिसृषु अनवध्यवसायाद्व्याप्त्यानन्त्याच्च ब्राह्मणत्वक्षत्रियत्ववैश्यत्वाद्येवाऽऽदाय त्रित्वपर्यवसानमिति । अत्रैव मनुः—

चतुर्थ एकजातिस्तु वर्णो नास्ति तु पञ्चमः ।

चतुर्थः शूद्रः वर्णशुद्धः । वर्णसङ्करस्त्वस्त्येव, वर्णसङ्करो न वर्णान्तर्गत इत्यप्याहुः । तत्र द्विजानां शूद्रादिभ्यो धर्मे विशेषमाह—

निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ।

निषेको गर्भाधानं तदाद्याः श्मशानं तसम्बन्धिन्यन्त्येष्टिः तदन्ताः क्रिया मन्त्रतो मन्त्रकरणिकाः । तेषां वै द्विजानामेव, न तु शूद्रस्याऽपि । अमन्त्रकास्तु तस्याऽपि क्रियाः । अत एव चूडाकरणान्ताः क्रियाः प्रकृत्य यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केन चित्समसृजत् छन्दसा तं प्रजापतिः ॥

शूद्र इति लिङ्गमविवक्षितमनुपादेयगतत्वात् । एवंविधः=चूडान्तक्रियावान्-अत एव संस्कृतः कार्यः । मन्त्रेण वैदिकेन 'वेद (२) मन्त्रवर्ज'—मित्येकमूलताऽनुरोधात् । केन चिद्गायत्र्यादिना प्रजापतिर्ब्रह्मा तं

(१) अपि इति ख. पुस्तके पाठः । (२) वेद इति ख. पुस्तके नास्ति ।

शूद्रं समसृजत् संयोजयामास तेनोपनयनं नास्तीत्यर्थः । तथा च श्रुतिः-'गायत्र्या ब्रा(१)ह्मणं समसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केन चिच्छन्दसा शूद्र' मिति । एवञ्च—

विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदा ।

इति ब्रह्मपुराणे मात्रपदेन उपनयनस्य वैदिकमन्त्रस्य वा व्यवच्छेदो, न गर्भाऽऽधानादीनामपीति मन्तव्यम् ॥ १० ॥

(मिता०) एतैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घातमुक्त्वा इदानीं वर्णादीनां धर्मान्वक्तुं प्रथमं तावद्वर्णानाह—

ब्रह्मेत्यादि । ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियवैश्या द्विजाः द्विर्जायन्त इति द्विजाः तेषां द्विजानां वै एवं न शू(२)द्रस्य । निषेकाद्याः निषेको गर्भाधानमाद्यो यासां तास्तथोक्ताः । श्मशानं पितृवनं तत्सम्बन्धि कर्म अ(३)न्ते यासां ताः क्रिया मन्त्रैर्भवन्ति ॥ १० ॥

(वी०मि०)उक्ता एव निषेकादिक्रियाः कालविशेषसम्बन्धेना ऽन्वक्कामन् । तासां फलमप्याह सार्धश्लोकाभ्याम्—

गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा ॥
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ॥ ११ ॥

गर्भ आधीयते ऽनेनेत्यादिव्युपत्तिभिर्गर्भाधानादिशब्दैस्तत्तत्संस्कारकर्माण्युच्यन्ते । ऋतौ=वा वक्ष्यमाणे काले । पुमा(४)न् सूयतेऽनेनेति पुंसवनं पुंसः सवनामित्यनेनोक्तम् । स्पन्दनात्=गर्भचलनात् । पूर्व=तृतीये मासीत्यर्थः । 'चतुर्थे स्पन्दते ततः' इति वचनात् । गर्भमासात् षष्ठेऽष्टमे वा=मासि सीमन्तोन्नयनम् । एते=आ(५)इते वहिर्गते गर्भकोशात् अपत्ये सति जन्मनि जातकर्म इत्यर्थः । 'प्रसवे जातकर्म च'-इति पाठः सुगमः । चशब्देन (६)प्रसङ्गादपत्यजन्मकालकृत्यानामन्येषां कर्मणां समुच्चयः । यद्वा—अग्रिमश्लोकस्यैकादश इत्यनन्तरं संयोज्यमानो-

---

(१) ब्रह्मणं-इति ख० पुस्तके । (२) न शूद्राणां क. (३) अन्तो यासां क.
(४) पुमांसं-इति क. ख. पुस्तकयोः पाठः । (५) आहते-इति क. पुस्तके, आयते-इति तु ख. पुस्तके. । (६) चशब्देस्तत्तत्कारकर्माण्युच्यंते, ऋतौ वा वक्ष्यमाणे काले पुमांसं सूयते प्रसङ्गात्-इत्यधिकः ख. पुस्तके पाठः ।

ऽत्राऽनुक्तान् द्वादशादीन् समुच्चिनोति ते च दर्शयिष्यन्ते ॥ ११ ॥ *

अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ॥
षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम् ॥ १२ ॥

(वी०मि०) एकादशे जन्मदिनात्, एतच्च सूतकान्तोपलक्षणम् । 'आशौचव्यपगमे नामधेयकरणम्' इति विष्णुवचनात् । अत्र श्रुतिः— 'एकादशे द्वादशे वा पिता नाम कुर्यात्' । मनुः—

नामधेयं दशम्यान्तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥

दशम्यां तिथौ=दशम दिन इति यावत् । एतच्चाशौचापकर्षे दशम्यामुपस्थाप्य ब्राह्मणान् भोजयित्वा पिता—

नामधेयं दशम्यान्तु केचिदिच्छन्ति पार्थिव ।
द्वादश्यामपरार्द्धाह्न्यां मासे पूर्णे तथा परे ॥
अष्टादशे ऽह्नि च तथा वदन्त्येके मनीषिणः ।

रात्रिपदमहोरात्रपरम् । गोभिलः—'जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणम्' । व्युष्टेऽतीते । अत्र कालविकल्पे व्यवस्थेति वक्ष्यते(१) । निष्क्रमः सूर्यस्य चन्द्रमसो वा दर्शनार्थमपत्यस्य सूतीगृहान्निस्सरणं चतुर्थे मासि । एतच्च छन्दोगानाम् । 'जननाद्यस्तृतीयो ज्यौत्स्नस्तस्य तृतीयायाम्' इति गोभिलवचनात् । ज्यौत्स्नः शुक्लपक्षः । 'षष्ठेऽन्नप्राशनं मासि' इति प्रथमः कल्पः ।

ततोऽन्नप्राशनं कार्यं मासि षष्ठे यथाविधि ।
अष्टमे वाऽपि कर्तव्यं यद्वेष्टं मङ्गलं कुले ॥

इति ब्रह्मपुराणे कालान्तरस्याऽपि विधानात् । लौगाक्षिरपि —'षष्ठे मासेऽन्नप्राशनं जातेषु दन्तेषु वा' । 'चूडा—चूडाकर्म । यथाकुलं कुलाचाराऽनुसारेण द्वितीये तृतीये वा ऽब्दे । तथा च मनुः—

ततः संवत्सरे पूर्णे चूडाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्तव्यं श्रुतिदर्शनात् ॥

---

* एकादशद्वादशश्लोकयोर्मिताक्षराख्या व्याख्या त्वेकत्र सम्बद्धेति द्वादशात् श्लोकादुत्तरमुभयोरपि मिताक्षरा द्रष्टव्या ।

(१) वक्ष्यते-इति क. पुस्तके नास्ति ।

द्वितीये पूर्णे इत्यनुपज्यते । तृतीये ऽल्पाऽवशिष्टे 'तृतीये भूयिष्ठे गते चूडा' इति लौगाक्षिवचनात् । इदञ्च तृतीयस्यैव चरमभागप्रशंसापरमिति न पौनरुक्त्यम् । कार्येति विभक्तिविपरिणामेन गर्भाधानादिषु उपनयनान्तेष्वप्यन्वेति । नाम्नस्तु करणं व्यवस्थापनमात्रमिति विशेषः । न च चूडापदवन्नामपदमपि कर्मविशेषपरमेवाऽस्त्विति वाच्यं, प्रामाणिकलिखनविरोधादिति ॥ १२ ॥

(मिता०) इदानीं ताः क्रिया अनुक्रामति—

गर्भाधानमिति । अहनीतिच । गर्भाधानमित्यनुगतार्थं कर्मनामधेयम् । एवं वक्ष्यमाणान्यपि । तद्गर्भाधानमृतौ ऋतुकाले वक्ष्यमाणलक्षणे । पुंसवनाख्यं कर्म गर्भचलनात्पूर्वम् । षष्ठेऽष्टमे वा मासि सीमन्तोन्नयनम् । एते च द्वे पुंसवनसीमन्तोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेव कार्ये न प्रतिगर्भम् । यथाऽऽह देवलः—

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।
यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत् ॥ इति ।

यद्वा एते=आ इते आगते गर्भकोशाज्जाते कु(१)मारे जातकर्म । एकादशेऽहनि ना(२)म । तच्च पितामहमातामहादिसम्बद्धं कुलदेवतासम्बद्धं वा । यथाह शङ्खः—'कुलदेवतासम्बद्धं पिता नाम कुर्यात्' इति । चतुर्थे मासि निष्क्रमणलक्षणं सूर्यावेक्षणं कर्म । षष्ठे मास्यन्नप्राशनं कर्म । चूडाकरणं तु यथाकुलं कार्यमिति प्रत्येकं सम्बध्यते ॥ ११ ॥ १२ ॥

(वी०मि०)उक्तक्रियाणामावश्यकत्वे ऽप्यानुषङ्गिकं फलमाह—

एवमेनः शमं याति वीजगर्भसमुद्भवम् ॥

एवं=एवंकृते वीजं शुक्रं शोणितं च, गर्भस्तदाशयः, तत्समुद्भवन्तत्सम्बन्धि । एनो ऽशुचित्वमपत्यस्य । अत्र गर्भाधानादित्रयं क्षेत्रसंस्कारद्वारा ऽपत्यसंस्कारकम् । क्षेत्रसंस्कारश्च प्रथमगर्भ एव जात इति न प्रतिगर्भमावर्तनीय, 'आरम्भणीया' न्यायात् । तथा च हारीतः—

सकृच्च कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥

---

(१) कुमारे जाते ख. (२) नामकरणम् ख.

सीमन्तेन तदन्तकर्मणा, न्यायतौल्यात्। वचनस्य चाऽस्य न्यायमूलकत्वात्। द्विजेति चोपलक्षणम्। अत एव—

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।

इति देवलेन संस्कृतेति नारीति च सामान्येनैवोक्तम्। जातकर्मादि तु साक्षादेवाऽपत्यसंस्कारकमिति प्रत्यपत्यमावर्तनीयमिति विवेकः। द्विजसंस्कारे तूपनयनमप्यधिकम्।

गार्भैर्होमैर्जातकर्म चौडमौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते। इति मनूक्तेः।

गार्भैर्होमैरिति तु पुंसवनादीनामप्युपलक्षणम्॥

(मिता०) एतेषां नित्यत्वेऽप्यानुषङ्गिकं फलमाह—

एवमिति। एवमुक्तेन प्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं याति। किंभूतम्। बीजगर्भसमुद्भवं शुक्रशोणितसम्बद्धं गात्रव्याधिसङ्क्रान्तिनिमित्तं वा न तु पतितोत्पन्नत्वादि॥

(वी०मि०)द्विजस्त्रीणां द्विजेभ्यः शूद्रादिभ्यश्च विशेषमाह—

तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः॥ १३॥

तूष्णीं=वेदमन्त्रेण विना। एताः=जातकर्माद्याः। स्त्रीणां=ब्राह्मण्यादितिसृणाम्। विवाहकर्माणि पत्युरधिकारस्तस्य च निषेकाद्या इत्यादितः सामान्यत एव मन्त्रप्राप्तौ—

वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः।

इति(१)वचनाद्विवाहस्य स्त्रीसंस्कारकत्वेन तत्प्राधान्यमभिप्रेत्य तथा च मन्त्राणामपि सम्बन्धमाह–विवाहस्तु समन्त्रकः, इति। अत्र जातकर्मादौ साङ्गोपाङ्गे मन्त्रा(२)णां निषेधः। तथा च मनुः—

अमान्त्रिका तु कार्येयं स्त्रियामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥

आवृत्=क्रिया। अशेषतः=सेतिकर्तव्यताका। एवं च विवाहेऽपि साङ्ग एव मन्त्रविधिरेकत्रेति न्यायादि(३)त्यर्थः॥ १३॥

---

(१) वचनाद्विवाहस्य-इत्यादेः-स मन्त्रक इति-इत्यन्तो भागः ख. पुस्तके नास्ति।
(२) मन्त्रामन्त्राणा-इति क. पुस्तके पाठः। (३) न्यायादिति-इति ख. पुस्तके पाठः।

(मिता०) स्त्रीणां विशेषमाह—

तूष्णीमिति । एता जातकर्मादिकाः क्रियाः स्त्रीणां तूष्णीं विनैव मन्त्रैर्यथाकालं कार्याः । विवाहः पुनः समन्त्रकः कार्यः ॥ १३ ॥

(वी०मि०)उपनयनकालमाह—

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ॥
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ १४ ॥

गर्भाधानसमयादष्टमे जन्मसमयादष्टमे वा वर्षे ब्राह्मणस्योपनायनम्। स्वार्थे णिच् । राज्ञां एकादश-इत्यत्र गुणभूतोऽपि गर्भशब्दोऽनुवर्तनीयः,आकाङ्क्षावलात्। तथा गोभिलः-'गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यम्' इति । विशां सैक-इत्यत्र एकादश इत्यनुषङ्गः, तेन द्वादश इत्यर्थः । एके=आचार्याः । यथाकुलं-कुलाचाराऽनुसारेण उपनयनमित्याहुः । एतेन कालान्तरमपि स्मृत्युक्तं तद्(१)नुक्तं च सूचितम् । (२)तथा च गौतमः-'उपनयनं ब्राह्मणस्याऽष्टमे नवमे पञ्चमे वा काम्यम्' । अष्टम इति नित्यकालनिर्देशः । मनुः—

ब्रह्मचर्यस्य काम्यस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहाऽर्थिनोऽष्टमे ॥

उपनयेदित्युपक्रम्य— आपस्तम्बः-'अष्टमे ब्रह्मवर्चसकामं नवमे तेजस्कामं दशमे ऽन्नाद्यकाममेकादश इन्द्रियकामं द्वादशे पशुकामम्' । अत्र संस्का(३)रप्रकरणे यज्ञ इव मासादयस्त्रिंशदहोरात्राद्यात्मका एवेति प्राञ्चः । सौरास्ते । परन्तु यस्मिन्मासे जन्मदिनं सम्पूर्णमेवाऽऽद्याय मासादिगणनमित्येके । अनयैव रीत्या मुख्याश्चान्द्रास्त इत्यपरे । परे पुनर्गौणचान्द्ररूपास्तिथिनिर्मिता मासिकादाविव प्रकृतेऽपि त इत्याहुः । कालविकल्पः फलविशेषाऽनुक्तौ पूर्वपूर्वसम्पत्तावुत्तरोत्तराश्रयणामित्येवं व्यवस्थितो बोध्यो न त्वैच्छिको, ऽष्टविधदोषादित्यन्यत्र व्युत्पादितम् । फलविशेषोक्तौ तु तदनुसारे व्यवस्था । सति सम्भवे स्वगृह्योक्त एव कल्प आदर्तव्य इति शिष्टाः ॥ १४ ॥

---

(१) तदनुक्तं-इति ख. पुस्तके नास्ति । (२) यथा-इति क. पुस्तके ।
(३) संस्कारेण-इति ख. पुस्तके पाठः ।